# shrIkRiShNAShTottarashatanAmastotram

# શ્રીકૃષ્ણાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : kRiShNAShTottarashatanAmastotram

File name : krishna108a.itx

Category : aShTottarashatanAma, vishhnu, krishna, stotra, vishnu

Location : doc_vishhnu

Author : Traditional

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : nAradapa.ncharAtra. Also same from Brahmandapurana.

Latest update : October 16, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 22, 2022

*sanskritdocuments.org*

shrIkRiShNAShTottarashatanAmastotram

# શ્રીકૃષ્ણાષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
ૐ અસ્ય શ્રીકૃષ્ણાષ્ટોત્તરશતનામસ્તોત્રસ્ય શ્રીશેષ ઋષિઃ,
અનુષ્ટુપ્-છન્દઃ, શ્રીકૃષ્ણો દેવતા, શ્રીકૃષ્ણપ્રીત્યર્થે
શ્રીકૃષ્ણાષ્ટોત્તરશતનામજપે વિનિયોગઃ ।
શ્રીશેષ ઉવાચ ।
ૐ શ્રીકૃષ્ણઃ કમલાનાથો વાસુદેવઃ સનાતનઃ ।
વસુદેવાત્મજઃ પુણ્યો લીલામાનુષવિગ્રહઃ ॥ ૧॥

શ્રીવત્સકૌસ્તુભધરો યશોદાવત્સલો હરિઃ ।
ચતુર્ભુજાત્તચક્રાસિગદાશઙ્ખામ્બુજાયુધઃ ॥ ૨॥

દેવકીનન્દનઃ શ્રીશો નન્દગોપપ્રિયાત્મજઃ ।
યમુનાવેગસંહારી બલભદ્રપ્રિયાનુજઃ ॥ ૩॥

પૂતનાજીવિતહરઃ શકટાસુરભઞ્જનઃ ।
નન્દવ્રજજનાનન્દી સચ્ચિદાનન્દવિગ્રહઃ ॥ ૪॥

નવનીતનવાહારી મુચુકુન્દપ્રસાદકઃ ।
ષોડશસ્ત્રીસહસ્રેશસ્ત્રિભઙ્ગો મધુરાકૃતિઃ ॥ ૫॥

શુકવાગમૃતાબ્ધીન્દુર્ગોવિન્દો ગોવિદામ્પતિઃ ।
વત્સપાલનસઞ્ચારી ધેનુકાસુરભઞ્જનઃ ॥ ૬॥

તૃણીકૃતતૃણાવર્તો યમલાર્જુનભઞ્જનઃ ।
ઉત્તાલતાલભેત્તા ચ તમાલશ્યામલાકૃતિઃ ॥ ૭॥

ગોપગોપીશ્વરો યોગી સૂર્યકોટિસમપ્રભઃ ।
ઇલાપતિઃ પરંજ્યોતિર્યાદવેન્દ્રો યદૂદ્વહઃ ॥ ૮॥

વનમાલી પીતવાસાઃ પારિજાતાપહારકઃ ।
ગોવર્ધનાચલોદ્ધર્તા ગોપાલઃ સર્વપાલકઃ ॥ ૯॥

અજો નિરઞ્જનઃ કામજનકઃ કઞ્જલોચનઃ ।
મધુહા મથુરાનાથો દ્વારકાનાયકો બલી ॥ ૧૦॥

વૃન્દાવનાન્તસઞ્ચારી તુલસીદામભૂષણઃ ।
સ્યમન્તકમણેર્હર્તા નરનારાયણાત્મકઃ ॥ ૧૧॥

કુબ્જાકૃષ્ણામ્બરધરો માયી પરમપૂરુષઃ ।
મુષ્ટિકાસુરચાણૂરમહાયુદ્ધવિશારદઃ ॥ ૧૨॥

સંસારવૈરી કંસારિર્મુરારિર્નરકાન્તકઃ ।
અનાદિર્બ્રહ્મચારી ચ કૃષ્ણાવ્યસનકર્ષકઃ ॥ ૧૩॥

શિશુપાલશિરચ્છેત્તા દુર્યોધનકુલાન્તકૃત્ ।
વિદુરાક્રૂરવરદો વિશ્વરૂપપ્રદર્શકઃ ॥ ૧૪॥

સત્યવાક્ સત્યસઙ્કલ્પઃ સત્યભામારતો જયી ।
સુભદ્રાપૂર્વજો વિષ્ણુર્ભીષ્મમુક્તિપ્રદાયકઃ ॥ ૧૫॥

જગદ્ગુરુર્જગન્નાથો વેણુવાદ્યવિશારદઃ । વેણુનાદવિશારદઃ
વૃષભાસુરવિધ્વંસી બકારિર્બાણબાહુકૃત્ ॥ ૧૬॥ var બાણાસુરબલાન્તકૃત્ ॥

યુધિષ્ઠિરપ્રતિષ્ઠાતા બર્હિબર્હાવતંસકઃ ।
પાર્થસારથિરવ્યક્તો ગીતામૃતમહોદધિઃ ॥ ૧૭॥

કાલીયફણિમાણિક્યરઞ્જિતશ્રીપદામ્બુજઃ ।
દામોદરો યજ્ઞભોક્તા દાનવેન્દ્રવિનાશનઃ ॥ ૧૮॥

નારાયણઃ પરમ્બ્રહ્મ પન્નગાશનવાહનઃ ।
જલક્રીડાસમાસક્તગોપીવસ્ત્રાપહારકઃ ॥ ૧૯॥

પુણ્યશ્લોકસ્તીર્થકરો વેદવેદ્યો દયાનિધિઃ ।
સર્વતીર્થાત્મકઃ સર્વગ્રહરૂપી પરાત્પરઃ ॥ ૨૦॥

ઇત્યેવં કૃષ્ણદેવસ્ય નામ્નામષ્ટોત્તરં શતમ્ ।
કૃષ્ણેન કૃષ્ણભક્તેન શ્રુત્વા ગીતામૃતં પુરા ॥ ૨૧॥

સ્તોત્રં કૃષ્ણપ્રિયકરં કૃતં તસ્માન્મયા પુરા ।
કૃષ્ણનામામૃતં નામ પરમાનન્દદાયકમ્ ॥ ૨૨॥

અનુપદ્રવદુઃખઘ્નં પરમાયુષ્યવર્ધનમ્

દાનં શ્રુતં તપસ્તીર્થં યત્કૃતં ત્વિહ જન્મનિ ॥ ૨૩॥

પઠતાં શ‍ૃણ્વતાં ચૈવ કોટિકોટિગુણં ભવેત્ ।
પુત્રપ્રદમપુત્રાણામગતીનાં ગતિપ્રદમ્ ॥ ૨૪॥

ધનાવહં દરિદ્રાણાં જયેચ્છૂનાં જયાવહમ્ ।
શિશૂનાં ગોકુલાનાં ચ પુષ્ટિદં પુષ્ટિવર્ધનમ્ ॥ ૨૫॥

વાતગ્રહજ્વરાદીનાં શમનં શાન્તિમુક્તિદમ્ ।
સમસ્તકામદં સદ્યઃ કોટિજન્માઘનાશનમ્ ॥ ૨૬॥

અન્તે કૃષ્ણસ્મરણદં ભવતાપભયાપહમ્ ।
કૃષ્ણાય યાદવેન્દ્રાય જ્ઞાનમુદ્રાય યોગિને ।
નાથાય રુક્મિણીશાય નમો વેદાન્તવેદિને ॥ ૨૭॥

ઇમં મન્ત્રં મહાદેવિ જપન્નેવ દિવાનિશમ્ ।
સર્વગ્રહાનુગ્રહભાક્ સર્વપ્રિયતમો ભવેત્ ॥ ૨૮॥

પુત્રપૌત્રૈઃ પરિવૃતઃ સર્વસિદ્ધિસમૃદ્ધિમાન્ ।
નિર્વિશ્ય ભોગાનન્તેઽપિ કૃષ્ણસાયુજ્યમાપ્નુનાત્ ॥ ૨૯॥

॥ ઇતિ શ્રીનારદપઞ્ચરાત્રે શ્રીકૃષ્ણાષ્ટોત્તરશતનામસ્તોત્રં સમાપ્તમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com, PSA Easwaran

*shrIkRiShNAShTottarashatanAmastotram*
pdf was typeset on October 22, 2022

Please send corrections to *sanskrit@cheerful.com*